लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2023

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु ***पञ्चप्रश्नाः*** संस्कृतेन देवनागरीलिप्या च समाधेयाः । 2×5 = 10

(क) शुकनासः कः आसीत् ? स कस्मै उपदेशं दत्तवान् ?

(ख) शुकनासोपदेशानुसारेण बुद्धिः कदा कालुष्यमुपयाति ?

(ग) जगति केषाम् उपदेष्टारः विरलाः ? तेषां वचनं जनाः कीदृशमनुगच्छन्ति ?

(घ) अनर्थपरम्परा इति पदेन किं बुध्यते ?

(ङ) शुकनासोपदेशे इयम् अनार्या का ? सा कस्मात् उत्थिता ?

(च) शुकनासोपदेशे अनर्थपरम्परा इति पदेन किं बुध्यते ?

(छ) शुकनासोपदेशस्य उत्सः कः ? अस्य ग्रन्थस्य रचयिता कः ?

2. अधोनिर्दिष्टं ***विषयद्वयमाश्रित्य*** टीका विरचनीया — 5×2 = 10

(i) राजलक्ष्मीः, (ii) वाडवानलः, (iii) गुरूपदेशः, (iv) मदजलम्, (v) कौटिल्यशास्त्रम् , (vi) चन्द्रापीडः ।

अथवा

अधोलिखितेषु ***द्वयं*** व्याख्येयम् — 5×2 = 10

(क) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति ।

(ख) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धदेशो भवति ।

(ग) तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति ।

## SECTION-B

3. ***कस्यचिदेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 10×1 = 10

(क) शिवराजविजये उल्लिखितस्य योगिराज-चरित्रं वर्णयतु।

(ख) आधुनिकगद्यकाव्यकाररूपेण अम्बिकादत्तव्यासस्य रचनाशैली विलिख्यताम्।

4. अधोलिखितेषु ***विषयमेकमाश्रित्य*** टीका विरचनीया — 5×1 = 5

(i) यवनराज्यवृत्तान्तः, (ii) सोमनाथतीर्थः।

अथवा

***कस्यचिदेकस्य*** अनुच्छेदस्य व्याख्या कार्या — 5×1 = 5

(क) बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्च आसीत्।

(ख) " कार्यं वा साधयेयं देहं वा पातयेयम् " इत्यस्य सारगर्भा महती प्रतिज्ञा।

## SECTION-C

5. ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 10×1 = 10

(क) " दण्डिनः पदलालित्यम् "— विचार्य्यताम्।

(ख) संस्कृतगद्यसाहित्यमवलम्ब्य एकः नातिदीर्घः प्रबन्धः विरचनीयः।

6. कमपि ***एकं*** विषयमाश्रित्य टीका लिख्यताम्। 5×1 = 5

(i) वासवदत्ता, (ii) हर्षचरितम्।

अथवा

***विषयमेकमवलम्ब्य*** व्याख्या कार्या — 5×1 = 5

(क) गद्यं कवीनां निकषं वदन्ति।

(ख) आख्यायिका।

——×——

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY